# Deshikotkarshamanjari

# देशिकोत्कर्षमञ्जरी

## Document Information

Text title : Deshikotkarshamanjari

File name : deshikotkarShamanjarI.itx

Category : deities_misc, gurudev, chandrashekharabhAratI

Location : doc_deities_misc

Author : chandrashekharabhAratI

Transliterated by : Aruna Narayanan narayanan.aruna at gmail.com

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Sri Gururaja Sukti Malika

Latest update : January 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 13, 2022

*sanskritdocuments.org*

# देशिकोत्कर्षमञ्जरी

यद्वक्त्राब्जनिरीक्षणादनुपमः पापी भवेद्धार्मिको
यद्वाचामृतसेचनादपि जडः स्यात्तत्त्वबोधे गुरुः ।
यत्सान्निध्यबलादियं वसुमती चाभूत्सतामास्पदं
स स्वामी मम देशिकस्तदितरो नाम्नाऽपि नाम्नायते ॥ १॥

यो बाल्ये विधिवद्विधूय कुतुकात्कर्माणि कर्मन्दिराट्
भूत्वा द्राक्समतीतरन्नतजनान्संसारवारान्निधिम् ।
यस्यासीत्करुणा विशेषमनिशं प्राणिष्वशेषेष्विह
स स्वामी मम देशिकस्तदितरो नाम्नाऽपि नाम्नायते ॥ २॥

यः स्वानुग्रहकाङ्क्षया निजपदाम्भोजातयुग्मं मुदा
संप्राप्तान्विविधार्तिपीडितजनान्प्रीत्याऽनुगृह्णन्स्थितः ।
यद्वक्त्रं नतकष्टबोधसमये शुष्कं भवेदञ्जसा
स स्वामी मम देशिकस्तदितरो नाम्नाऽपि नाम्नायते ॥ ३॥

भक्तिर्यस्य गुरौ नितान्तमभवद्यस्याः प्रभावात्सदा
सन्तुष्टः स्वसमीपमागतवतस्तुष्टान्तरङ्गान्व्यधात् ।
यस्यासीच्च दृढा मतिः श्रुतिततौ तन्मार्गसंरक्षणे
स स्वामी मम देशिकस्तदितरो नाम्नाऽपि नाम्नायते ॥ ४॥

कीर्तिर्यस्य दिगङ्गनाप्रियसखी मूर्तिश्च हेमाकृतिः
स्फूर्तिर्देवगुरुं सदोपहसतीवार्तिं नतानां जवात् ।
पूर्तिश्चापि दयारसस्य हरते सूक्तिः सुधास्यन्दिनी
स स्वामी मम देशिकस्तदितरो नाम्नाऽपि नाम्नायते ॥ ५॥

तुङ्गातीरलसत्तपोवनभुवि स्वैरं चरन्नन्वहं
गङ्गावारिलसज्जटाविलसितं चित्ते मुदा भावयन् ।
तुङ्गानन्दविधायकः प्रणमतां शृङ्गाद्रिवासप्रियः
स स्वामी मम देशिकस्तदितरो नाम्नाऽपि नाम्नायते ॥ ६॥

यस्यास्तिक्यमभूदशेषजनताविस्मापकं भूतले
यत्कर्माचरणप्रवृत्तिरभवन्मुख्यं प्रमाणं नृणाम् ।
यत्क्षान्त्या वसुधा मुमोच तरसा सर्वंसहत्वप्रथां
स स्वामी मम देशिकस्तदितरो नाम्नाऽपि नाम्नायते ॥ ७॥

आत्मानात्मविवेचनेऽतिचतुरो मिथ्यात्वमापादय-
न्द्वैतस्यात्मनि सत्यतामतिदृढं सम्पादयन् शास्त्रतः ।
यस्तत्त्वं मनसा विचिन्त्य नितरां लेभेऽनुभूतिं निजां
स स्वामी मम देशिकस्तदितरो नाम्नाऽपि नाम्नायते ॥ ८॥

शास्त्रार्थान्बहुधा विचार्य विबुधैः साकं विनेयानलं
सम्बोध्य श्रुतिभिस्तदङ्गनिचयैस्तर्कैस्तदन्तर्गतैः ।
निश्चित्य स्वयमात्मतत्त्वमखिलांश्चक्रे सुबोधान्सुखं
स स्वामी मम देशिकस्तदितरो नाम्नाऽपि नाम्नायते ॥ ९॥

उत्पद्यात्मविदग्रजन्मभवने गर्भाष्टमे संस्कृतो
यः पूर्वार्जितपुण्यपुञ्जविभवैः संप्राप्ततुर्याश्रमः ।
वैराग्यादिभिरद्भुतैर्गुणगणैः श्रीशङ्करार्योऽपरः
स स्वामी मम देशिकस्तदितरो नाम्नाऽपि नाम्नायते ॥ १०॥

यः कल्याणपुरे विशालमतुलं निर्माप्य कञ्चिन्मठं
सद्विद्याप्रचयाय तत्र विदुषः साकं महाध्येतृभिः ।
संस्थाप्याशनवस्त्रवासनिलयान्दत्वाऽऽत्मविद्यामपात्
स स्वामी मम देशिकस्तदितरो नाम्नाऽपि नाम्नायते ॥ ११॥

शुद्धाद्वैतमतप्रचारणकृते वादेन जित्वा तु यां
शृङ्गाद्रौ वरचक्रराजनिलयां चक्रे जगद्देशिकः ।
यस्तस्यै निरमापयत् दृढतरं कान्तं शिलामन्दिरं
स स्वामी मम देशिकस्तदितरो नाम्नाऽपि नाम्नायते ॥ १२॥

यः श्रीशङ्करदेशिकेन्द्रजननस्थानं विदित्वा चिरात्
कृत्वा चात्मवशं मुदा धनचयैर्निर्माप्य सन्मन्दिरम् ।
तत्र स्थापयतिस्म शङ्करगुरोर्देव्याश्च मूर्तिं गिरां
स स्वामी मम देशिकस्तदितरो नाम्नाऽपि नाम्नायते ॥ १३॥

सत्यं वाचि दया नतेषु पटुता धर्माध्वसंरक्षणे

सौजन्यं सुजने भृशं विमुखता दुष्टेषु यस्याभवत् ।
रक्तिर्ब्रह्मणि निन्दितेषु विषयेष्वासीद्विरक्तिर्दृढा
स स्वामी मम देशिकस्तदितरो नाम्नाऽपि नाम्नायते ॥ १४॥

यस्यासीत् दृढभावना पथि कृतास्वेधोमृदश्मादिभि-
र्देवानां प्रतिमासु दृष्टिविषयं यातास्वकस्मादपि ।
पूजास्तोत्रजपादिकर्मसु दृढा तादात्म्यधीरञ्जसा
स स्वामी मम देशिकस्तदितरो नाम्नाऽपि नाम्नायते ॥ १४॥

पापौघं ध्वंसयित्वा बहुजनिरचितं किं च पुण्यालिमारा-
त्सम्पाद्यास्तिक्यबुद्धिं श्रुतिगुरुवचनेष्वादरं भक्तिदार्ढ्यम् ।
देवाचार्यद्विजातिष्वपि मनुनिवहे तावकीने नितान्तं
विद्यां शुद्धां च बुद्धिं कमलजदयिते सत्वरं देहि मह्यम् ॥ १५॥

इति श्रीजगद्गुरु श्रीशृङ्गेरीपीठाधिप श्रीचन्द्रशेखरभारती
श्रीपादैः विरचिता श्रीदेशिकोत्कर्षमञ्जरी समाप्ता ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Deshikotkarshamanjari*

pdf was typeset on March 13, 2022

Please send corrections to *sanskrit@cheerful.com*